॥श्रीगणेशायनमः॥ व्याप्त्यनंतरं पक्षधर्मता निरूप्यते॥ तत्र न तावत्स
दिग्धसाध्यधर्मत्वं पक्षत्वं संदेहेन विशेषणं परामर्शपूर्वं लिंगदर्शन
व्याप्तिस्मरणादिना तस्यनाशात्॥ नोपलक्षणं आव्यावर्त्तकत्वाप
तेः॥ नापि साधकबाधकप्रमाणाभावः उभयाभावस्य प्रत्येकस
त्वेपिसत्वात्॥ नाप्यभावद्वयं तथाविधबाधकप्रमाणाभावस्य व्य
र्थत्वात्॥ हृदादेः पक्षत्वेपि बाधहेत्वसिद्ध्यादिरावश्यकत्वेनानुमित्यु
नुत्पादात्॥ नापि साधकप्रमाणाभावः॥ श्रोतव्यो मंतव्य इति श्रु
त्यासमानविषयकश्रवणानंतरमननबोधनात्॥ प्रत्यक्षद

ऽप्यनुमानदर्शनात् ॥ एकलिंगावगतेपिलिंगांतरेणानुमानाच्चमत
व्यश्चोपपत्तिभिरितिस्मरणात् ॥ अथसिषाधयिषितसाध्यध
र्मधर्मीपक्षः ॥ तथाहिमुमुक्षोःशब्दादात्मावगमेपिमननस्य
मोक्षोपायत्वेन सिद्धिविशेषानुमितिच्छया आत्मानुमानं ॥ अत
एवप्रत्यक्षपरिकलितमप्यनुमानेनबुभूत्संतेतर्करसिकाः ॥
नहिकारिणंदृष्टचीत्कारेणतमनुमिमते ॥ नुमातारः इतिवा
चस्पतिवचनयोरविरोधः आनुपित्सातद्विरहाभ्यांतदुपप शिव
त्तेरितिचेन्न ॥ संदेहवत्परामर्शपूर्वंसिषाधयिषायाअभावात् १

योग्यतायाश्चानिरूपणात्॥ सिषाधयिषाविरहेपि घनगर्जितेन मेघानुमानात्॥ स्वकारणाधीनपरामर्शबलेनं अनपेक्षितानुमानदर्शनाच्चाउच्यते सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावोयत्र सपक्षः॥ तेन सिषाधयिषाविरहसहकृतं साधकप्रमाणंयत्रास्ति सनपक्षः॥ एवसाधकप्रमाणसत्यसतिवा सिषाधषायत्रवाउभयाभावः॥ तत्र विशिष्टाभावात्पक्षत्वंयद्यपि पक्षतस्यकेवलान्वयित्वात्तस्य भेदकत्वं तथापि पक्षपरामर्शहेतुत्ति निमित्तत्वमुक्तं॥ समाप्त॥ ६४॥